— द्वात्रिंशत्सु पत्रेषु द्वात्रिंशदक्षरं मन्त्रराजं नारसिंहम्

3. मन्त्रराजस्य नारसिंहस्य फलं नो ब्रूहि

— य एतं मन्त्रराजं नारसिंहं ..नित्यमधीते 4—9.

Nṛisut. 2. नारसिंहेनानुष्टुभा ..तुरीयं विद्यात्

Râmap. 72. नारसिंहं च वाराहम्

1. नारायण adj.

Nṛip. 5. 2. अष्टसु पत्रेष्वष्टाक्षरं नारायणं भवति

2. नारायण

Maitri. 6. 8. एष हि खल्वात्मा ..नारायणः 7. 7.

Mahânâr. 3. 16. नारायणाय विद्महे

Mahânâr. 11. 1. विश्वं नारायणं देवम्

2. विश्वं नारायणं हरिम् Mahâ. 3.

3. नारायणं महाज्ञेयम्

4. नारायणः परो ज्योतिरात्मा नारायणः परः

— नारायणः परं ब्रह्मतत्त्वं नारायणः परः

5. नारायणः परो ध्याता ध्यानं नारायणः परः

6. सर्वं व्याप्य नारायणः स्थितः Vâsu. 3.

Garbha. 4. तत् प्रपद्ये नारायणम्

Mahâ. 1. एको ह वै नारायण आसीत्

2. पुनरेव नारायणःसोन्यत्कामः 3.

Nâr. 1. पुरुषो ह वै नारायणः

— नारायणात्प्राणो जायते

— नारायणाद्ब्रह्मा जायते

— नारायणाद्रुद्रो जायते

— नारायणात्प्रजापतिर्जायते

— नारायणादिन्द्रो जायते

— नारायणादष्टौ वसवो नारायणादेकादश रुद्राः

— नारायणाद्द्वादशादित्याः

— सर्वाणि च भूतानि नारायणादेव समुत्पद्यन्ते नारायणे प्रलीयन्ते

2. नित्यो देव एको नारायणः

— ब्रह्मा च नारायणः

— शिवश्च नारायणः शक्रश्च नारायणः

— द्वादशादित्याश्च नारायणः

— वसवो ऽश्विनौ च नारायणः

— सर्वे ऋषयो ऽपि नारायणः

— कालश्च नारायणो दिशश्च नारायणः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Nâr. 2. अधश्च नारायण ऊर्ध्वं च नारायणः
— मूर्त्तामूर्त्तं च नारायणः
— अन्तर्बहिश्च नारायणः
— नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यम्
3. एतद्वै नारायणस्योपनिषदम्
— यो ह वै नारायणस्योपनिषदमधीते
4. नारायणायेत्युपरिष्टात्
— नारायणायेति पञ्चाक्षराणि
— तद्वै नारायणस्याष्टाक्षरं पदम्
— यो ह वै नारायणस्याष्टाक्षरं पदमध्येति
5. ओं नमो नारायणाय Atmapra. 1 (bis).
— सर्वभूतस्थमेकं नारायणम् Atmapra. 1.
— नारायणे सायुज्यमाप्नोति

Vâsu. 4. नारायणे मय्यचला भक्तिः

Skanda. 14. विरिञ्चिनारायणशंकरात्मक

Râmap. 64. तेषु नारायणाष्टार्णम्

Râmot. 5. नारायणमनामयम्

Mukti. 1. 31. गर्भो नारायणो हंसः
1. *vide* सरस्वतीरहस्य

नारायणात्मक

Râmap. 80. नारायणात्मकः कालः

नाराशंसी

Nṛip. 5. 9. स नाराशंसीरधीते

नारी

Gîtâ. 10. 34. कीर्त्तिः श्रीर्वाक् च नारीणाम्

नालमार्ग

Dhyâna. 22. कर्षयेन्नालमार्गेण

नाश

Chhâ. 8. 9. 1. शरीरस्य नाशमन्वेष नश्यति 2.

Kaivalya. 22. न पुण्यपापे मम नास्ति नाशः

Skanda. 2. अन्तःकरणनाशेन
7. कर्मनाशे सदाशिवः

Mukti. 2. 28. शरीरनाशदर्शित्वात्
33. अस्य नाशमिदानीं . . शृणु
39. मनसो ऽभ्युदयो नाशः
— शमनो नाशमभ्येति

Gîtâ. 2. 40. नेहाभिक्रमनाशो ऽस्ति
11. 29. विशन्ति नाशाय समृद्धवेगाः
— तथैव नाशाय विशन्ति लोकाः

नाशन

Gîtâ. 3. 41. ज्ञानविज्ञाननाशनम्
16. 21. त्रिविधं . . नाशनमात्मनः

नासाग्रदृष्टि

Yogaśi. 2. कुर्यान्नासाग्रदृष्टिं च

नासाभ्यन्तरचारिन्

Kshur. 5. प्राणान् सञ्चारयेद्योगी नासाभ्यन्तरचारिणः

Gîtâ. 5. 27. प्राणापानौ समौ कृत्वा नासाभ्यान्तरचारिणौ

नासिका

Ait. 1. 4. नासिके निरभिद्येतां नासिकाभ्यां प्राणः
2. 4. वायुः प्राणो भूत्वा नासिके प्राविशत्

Bṛih. 2. 4. 11. सर्वेषां गन्धानां नासिके एकायनम् 4. 5. 12.

Śwet. 2. 9. क्षीणे प्राणे नासिकयोच्छ्वसीत (2 MSS. read नासिकयोः श्वसीत)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

Garbha. 1. नासिका घ्राणे
3. षष्ठ मुखनासिकाक्षिश्रोत्राणि

Prâṇâg. 4. नासिकोत्तरवेदिः

Dhyâna. 23. नासिकायां तु मूलतः

Nyâsa. 5. श्रवणे नासिके न गन्धाय

Praśna. 3. 5. मुखनासिकाभ्याम्

नासिकाग्र

Gîtâ. 6. 13. सम्प्रेक्ष्य नासिकाग्रं स्वम्

नासिकापुट

Amṛita. 19. नासिकापुटमङ्गुल्या पिधाय

नासिक्य

Chhâ. 1. 2. 2. ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे

नासी

Jâbâla. 2. वरणायां नास्यां च मध्ये (one MS. वरणाया नास्याश्च); Râmot. 4.
— का च नासी (one MS. केन नासी); Râmot. 4.
— सर्वानिंद्रियकृतान्पापान्नाशयतीति तेन नासी भवति Râmot. 4.

नास्तिक

Mukti. 1. 48. नास्तिकाय कृतघ्नाय

नास्तिक्य

Maitri. 3. 5. नास्तिक्यमज्ञानं...इति तामसानि

नि

Chhâ. 2. 8. 2. यन्नीति तन्निधनम्

निःशङ्क

Mukti. 2. 13. निःशंकमेव नश्यन्ति

निःशब्द

Maitri. 6. 23. निःशब्दः शून्यभूतस्तु

Kshur. 2. निःशब्दं देशमास्थाय
21. निःशब्दं देशमास्थितः

Dhyâna. 4. निःशब्दं परमं पदम्

निःश्रेयस

Kaush. 2. 14. प्राणे निःश्रेयसं विदित्वा (bis).
3. 2. अस्ति त्वेव प्राणानां निःश्रेयसम्

निःश्रेयसकर

Gîtâ. 5. 2. निःश्रेयसकरावुभौ

निःश्रेयसादान

Kaush. 2. 14. अथातो निःश्रेयसादानम्

निःश्वस्

Bṛih. 2. 4. 10. महतो भूतस्य निःश्वसितम् 4. 5. 11; Maitri. 6. 32.

निःष्ठा

Chhâ. 6. 9. 1. यथा मधु मधुकृतो निस्तिष्ठन्ति
7. 20. 1. यदा वै निस्तिष्ठत्यथ श्रद्दधाति..निस्तिष्ठन्नेव श्रद्दधाति
7. 21. 1. यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति

निःसङ्कल्प

Maitri. 6. 19. निःसङ्कल्पस्ततस्तिष्ठेत्
30. तस्मात्..निःसङ्कल्पः..तिष्ठेत्

निःसङ्ग

Gauḍa. 3. 45. निःसङ्गः प्रज्ञया भवेत्
4. 79. निःसङ्गं विनिवर्त्तते

Kshur. 21. निःसङ्गस्तत्त्वयोगज्ञः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निःसार

Maitri. 1. 3. निःसारे ऽस्मिञ्छरीरे

निःसृ

Katha. 6. 2. सर्वं प्राण एजति निःसृतम्

निःस्पृह

Gîtâ. 2. 71. पुमांश्चरति निःस्पृहः
6. 18. निःस्पृहः सर्वकामेभ्यः

निःस्वधाकार

Gauḍa. 2. 37. निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च

निकृत्

Kshur. 13. धारणाभिर्निकृन्तयेत्

निकृन्तन

Mukti. 1. 45. सर्वाघौघनिकृन्तनम्

निकेतन

Kaṭhaśru. 1. जलतीरे निकेतनं हि

निक्षिप्

Prâṇâg. 1. अन्नं भूमौ निक्षिप्य

निखिल

Śwet. 1. 3. यः कारणानि निखिलानि तानि . . अधितिष्ठति

निगद्

Kshur. 10. वेदान्तेषु निगद्यते

निगम्

Bṛih. 2. 1. 18. उतेवोच्चावचं निगच्छति
4. 3. 36. अणिमानं निगच्छति
Gîtâ. 9. 31. शश्वच्छान्तिं निगच्छति
18. 36. दुःखान्तं च निगच्छति

निगम

Kṛish. 8. निगमो वसुदेवः

निगुह्

Śwet. 1. 3. अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्
14. देवं पश्येन्निगूढवत् Brahma. 3.
Kaivalya. 1. सदा सद्भिः सेव्यमानां निगूढाम्
Brahmab. 20. घृतमिव पयसि निगूढम्
Dhyâna. 20. एवं पश्येन्निगूढवत् (so 5 MSS.; one has देवं)

निगृहीतानिल

Maitri. 6. 21. परः पूर्वं प्रतिष्ठाप्य निगृहीतानिलम्

निगॄ

Maitri. 2. 6. यो ऽयं पीताशितमुद्गिरति निगिरति

निग्रह्

Gauḍa. 3. 34. निगृहीतस्य मनसः
35. निगृहीतं न लीयते
42. उपायेन निगृह्णीयात्
Mukti. 2. 41. निगृहीतेन्द्रियाद्विषः
Gîtâ. 2. 68. निगृहीतानि सर्वशः
9. 19. वर्षं निगृह्णाम्युत्सृजामि च

निग्रह

Gauḍa. 3. 41. मनसो निग्रहस्तद्वत्
Mukti. 2. 38. मनसः स्वस्य निग्रहे
Gîtâ. 3. 33. निग्रहः किं करिष्यति
6. 34. तस्याहं निग्रहं मन्ये

निग्रहायत्त

Gauḍa. 3. 40. मनसो निग्रहायत्तम् (MSS. read निग्रहो यत्तत्)

निचि

Bṛih. 4. 4. 18. ते निचिक्युर्ब्रह्म पुराणम्
Kaṭha. 1. 17. देवमीड्यं विदित्वा निचाय्य

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Kaṭha. 3. 15. निचाय्य तन्मृत्युमुखात्प्रमुच्यते

Śwet. 2. 1. अग्नेर्ज्योतिर्निचाय्य

4. 11. वरदं देवमीड्यं निचाय्य Siras. 5.

निज

Skanda. 2. न निजं निजवद्भाति

14. वेदात्मकं ब्रह्म निजं विजानते

नितप्

Chhâ. 7. 11. 1. निशोचति नितपति वर्षिष्यति वै

नितल

Aruṇeya. 1. *vide* तलातल

नित्य

Bṛih. 4. 4. 23. एष नित्यो महिमा ब्राह्मणस्य

Kaṭha. 2. 18. अजो नित्यः शाश्वतोऽयं पुराणः Gîtâ. 2. 20.

3. 15. अरसं नित्यमगन्धवच्च Mukti. 2. 72.

5. 13. नित्यो नित्यानां चेतनश्चेतनानाम् Śwet. 6. 13.

Śwet. 1. 12. एतज्ज्ञेयं नित्यमेवात्मसंस्थम्

3. 21. ब्रह्मवादिनो हि प्रवदन्ति नित्यम्

4. 21. तेन मां पाहि नित्यम्

6. 2. येनावृतं नित्यमिदं हि सर्वम्

17. य ईशे अस्य जगतो नित्यं

Maitri. 7. 8. नित्यं शिल्पोपजीविनः

Muṇḍ. 1. 1. 6. नित्यं विभुं सर्वगतम्

3. 1. 5. सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्

Mahânâr. 11. 2. विश्वतः परमं नित्यम् Mahâ. 3.

Kaivalya. 16. सूक्ष्मात् सूक्ष्मतरं नित्यम्

Gauḍa. 1. 3. विश्वो हि स्थूलभुङ् नित्यम्

3. 33. ब्रह्म ज्ञेयमजं नित्यम्

4. 11. भिन्नं नित्यं कथं च तत्

59. नासौ नित्यो न चोच्छेदी

72. चित्तं निर्विषयं नित्यम्

82. सुखमाव्रियते नित्यम्

Nṛip. 4. 3. एतैर्द्वात्रिंशन्मन्त्रैर्नित्यं देवं स्तुवध्वम्

— य एतैर्मन्त्रैर्नित्यं देवं स्तौति Râmot. 5.

5. 3. य एतं मन्त्रराजं . . नित्यमधीते 4—9.

Nṛisut. 9. नित्यः शुद्धो बुद्धः

— किं तन्नित्यमात्मा (so 2 MSS.; but, Nârâyaṇa किंतन्निरात्मकमात्मनः)

— नित्यं शुद्धं बुद्धं मुक्तम्

Śiras. 1. सोऽहं नित्यानित्यः

3. हृदि त्वमसि यो नित्यम्

5. यस्त्वां ध्यायते नित्यम् (4 times)

Brahmab. 3. तस्मान्निर्विषयं नित्यम्

Amṛita. 25. अतः समभ्यसेन्नित्यम्

27. नित्यं योगी विवर्जयेत्

28. नित्यमभ्यस्यतः क्रमात्

Haṁsa. 2. शुद्धो बुद्धो नित्यः

Nâr. 2. नित्यो देव एको नारायणः

— नित्यो निष्कलंको निराख्यातः

Vâsu. 3. नित्यमेकाग्रभक्तिस्तु

— मुमुक्षुर्धारयेन्नित्यम्

Râmot. 2. य एतत्तारकं ब्राह्मणो नित्यमधीते

5. एतैः सप्तचत्वारिंशन्मन्त्रैर्नित्यं देवं स्तुवन्

Mukti. 1. 22. द्विजो नित्यमनन्यधीः

2. 72. मम रूपमीदृशं भजस्व नित्यम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Gîtâ. 2. 18. नित्यस्य . . शरीरिणः
21. वेदाविनाशिनं नित्यम्
24. नित्यः सर्वगतः स्थाणुः
26. नित्यं वा मन्यसे मृतम्
30. देही नित्यमवध्यो ऽयम्
3. 15. नित्यं यज्ञे प्रतिष्ठितम्
31. ये मे मतमिदं नित्यम्
9. 6. यथाकाशस्थितो नित्यम्
10. 9. कथयन्तश्च मां नित्यम्
11. 52. नित्यं दर्शनकांक्षिणः
13. 9. नित्यं च समचित्तत्वम्
18. 52. ध्यानयोगपरो नित्यम्

नित्यजात

Gîtâ. 2. 26. अथ चैनं नित्यजातम्

नित्यतृप्त

Gîtâ. 4. 20. नित्यतृप्तो निराश्रयः

नित्यत्व

Sarvop. 2. नित्यत्वेन प्रतीयमानः
Gîtâ. 13. 11. अध्यात्मज्ञाननित्यत्वम्

नित्यानिवृत्त

Nṛisut. 9. नित्यनिवृत्तापि मूढैरात्मैव दृष्टा
Parama. 2. यो हेतुस्तेन नित्यानिवृत्तः

नित्यपुष्ट

Mahânâr. 4. 8. नित्यपुष्टां करीषिणीम्

नित्यपूतस्थ

Parama. 1. स एव नित्यपूतस्थ इति
2. तन्नित्यपूतस्थस्तस्य स्वयमेव स्थितिरिति
— यदा पदे नित्यपूतस्थः (so Nârâyaṇa, but no MS. of the text. *Vide* निरन्तरपूतस्थ)

नित्यप्रमुदित

Maitri. 7. 8. नित्यप्रमुदिता नित्यप्रवासिताः

नित्यप्रवासित

Maitri. 7. 8. See above.

नित्यमुक्त

Maitri. 6. 28. नित्यमुक्तस्य देहिनः (MS. reads नित्ययुक्तस्य)

नित्ययाचनक

Maitri. 7. 8. नित्यप्रवसिता नित्ययाचनकाः

नित्ययुक्त

Gauḍa. 1. 25. प्रणवे नित्ययुक्तस्य न भयम्
Gîtâ. 7. 17. तेषां ज्ञानी नित्ययुक्तः
8. 14. नित्ययुक्तस्य योगिनः
9. 14. नित्ययुक्ता उपासते 12. 2.

नित्यवैरिन्

Gîtâ. 3. 39. ज्ञानिनो नित्यवैरिणा

नित्यशस्

Kshur. 12. योगमाश्रित्य नित्यशः
Brahmab. 14. स जानाति च नित्यशः
Gîtâ. 8. 14. यो मां स्मरति नित्यशः

नित्यसत्त्वस्थ

Gîtâ. 2. 45. निर्द्वन्द्वो नित्यसत्त्वस्थः

नित्यसन्न्यासिन्

Gîtâ. 5. 3. ज्ञेयः स नित्यसन्न्यासिन्

नित्यानन्द

Nṛisut. 2. अव्यभिचारिणं नित्यानन्दम्
Râmap. 6. नित्यानन्दे चिदात्मनि
Mukti. 2. नित्यानन्दावाप्तिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नित्याभियुक्त

Gîtâ. 9. 22. तेषां नित्याभियुक्तानाम्

निदर्शन

Gauḍa. 3. 3. जातावेतन्निदर्शनम्
4. 33. कायस्यान्तर्निदर्शनात्
Nṛip. 3. 1. तदेतदृषिणोक्तं निदर्शनम् (bis).

निदह्

Mahânâr. 6. 2. अरातीयतो निदहाति वेदः

निदाघ

Jâbâla. 6. *vide* प्रभृति

निदान

Nṛip. 4. 2. नृसिंहगायत्री देवानां वेदानां निदानं भवति

निदानवन्त्

Nṛip. 4. 2. य एवं वेद स निदानवान् भवति

निदिध्यासन

Mukti. 1. श्रवणमननिदिध्यासनानि

निद्रा

Maitri. 3. 5. निद्रा तन्द्रा..इति तामसानि
6. 25. निद्रेवान्तर्हितेन्द्रियः
Gauḍa. 1. 14. न निद्रां नैव च स्वप्नम्
Haṁsa. 2. आग्नेय्यां निद्रालस्यादयो भवन्ति
Râmap. 74. निद्रायाः स्मृतिः
Gîtâ. 14. 8. प्रमादालस्यनिद्राभिः
18. 39. निद्रालस्यप्रमादोत्थम्

निद्रातत्त्व

Gauḍa. 1. 15. निद्रातत्त्वमजानतः

निधन

Chhâ. 2. 2. 1. द्यौर्निधनम्
2. पृथिवी निधनम्
2. 3. 2. उद्गृह्णाति तन्निधनम् 2. 15. 1.
2. 4. 1. समुद्रो निधनम् 2. 17. 1.
2. 5. 1. हेमन्तो निधनम् 2. 16. 1.
2. 6. 1. पुरुषो निधनम् 2. 18. 1.
2. 7. 1. मनो निधनम्
2. 8. 2. यन्नीति तन्निधनम्
2. 9. 8. यत्प्रथमास्तमिते तन्निधनम्
2. 10. 4. निधनमिति त्र्यक्षरम्
2. 11. 1. प्राणो निधनम्
2. 12. 1. उपशाम्यति तन्निधनं संशाम्यति तन्निधनम्
2. 13. 1. कालं गच्छति तन्निधनं पारं गच्छति तन्निधनम्
2. 14. 1. अस्तं यन्निधनम्
2. 19. 1. मज्जा निधनम्
2. 20. 1. चन्द्रमा निधनम्
2. 21. 1. सर्पा गन्धर्वाः पितरस्तन्निधनम्
Bṛih. 6. 3. 4. निधनमसि संवर्गो ऽसि
Maitri. 6. 22. अशब्दे निधनमेति
Brahma. 1. स देवानां निधनमनिधनम्
Gîtâ. 3. 35. स्वधर्मे निधनं श्रेयः

निधनभाजिन्

Chhâ. 2. 9. 8. निधनभाजिनो ह्येतस्य साम्नः

निधा

Kena. 19. तस्मै तृणं निदधौ 23.
Chhâ. 1. 10. 5. तान् प्रतिगृह्य निदधौ
2. 9. 8. तस्मात्तान्निदधाति
8. 3. 2. हिरण्यनिधिं निहितं .. न विन्देयुः
Bṛih. 2. 2. 3. यशो निहितं विश्वरूपम् (ter)
3. 2. 13. अप्सु लोहितं च रेतश्च निधीयते

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Tait. 2. 1. 1. निहितं गुहायां परमे व्योमन्
Katha. 1. 14. विद्धि त्वमेनं निहितं गुहायाम्
2. 20. आत्मास्य जन्तोर्निहितो गुहायाम्
Katha. 4. 8. अरण्योर्निहितो जातवेदाः
Śwet. 3. 20. आत्मा गुहायां निहितो ऽस्य जन्तोः Mahânâr. 8. 3.
5. 1. विद्याविद्ये निहिते यत्र गूढे
Maitri. 1. 2. विराज्ये पुत्रं निधापयित्वा
2. 6. एष पञ्चधात्मानं विभज्य निहितो गुहायाम्
4. 5. निहितमस्माभिरेतत्..मनासि
6. 4. पुनः पञ्चधाज्ञेयं निहितं गुहायाम्
7. यो ह वा अमुष्मिन्नादित्ये निहितः..एष भर्गाख्यः
19. तत्र चित्तं निधायेत
24. ध्यानमन्तः परे तत्त्वे लक्ष्येषु च निधीयते
27. आविः सन्नभसि निहितम्
— भूमावयस्पिण्डं निहितम्
Muṇḍ. 2. 1. 8. गुहाशया निहिताः Mahânâr. 8. 4.
10. एतद्यो वेद निहितं गुहायाम्
2. 2. 2. यस्मिन् लोका निहिता लोकिनश्च
3. 1. 7. पश्यत्स्विहैव निहितं गुहायाम्
3. 2. 1. यत्र विश्वं निहितं भाति शुभ्रम्
Mahânâr. 2. 4. अमृतं..निहितं गुहासु
— त्रीणि पदा निहिता गुहासु
10. 5. परेण नाकं निहितं गुहायाम् Kaivalya. 3.
Nîla. 16. अस्मिन्निधेहि तम्

निधान

Muṇḍ. 3. 1. 6. यत्र तत्सत्यस्य परमं निधानम्
Gîtâ. 9. 18. निधानं बीजमव्ययम्
11. 18. त्वमस्य विश्वस्य परं निधानम् 38.

निधि

Chhâ. 7. 1. 2. अध्येमि..निधिम्
4. नाम वै..निधिः
7. 2. 1. वाग्वै...विज्ञापयति..निधिम्
7. 7. 1. विज्ञानेन वै..विजानाति ..निधिम्

निध्यै

Bṛih. 2. 4. 4. व्याचक्षाणस्य तु मे निदिध्यासस्वेति 4. 5. 5.
5. आत्मा...निदिध्यासितव्यः 4. 5. 6.

निनद

Chhâ. 3. 13. 8. निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति

निनाद

Brahmav. 13. कांस्यघण्टानिनादस्तु

निन्द्

Chhâ. 2. 14. 2. तपन्तं न निन्देत्तद्व्रतम्
2. 15. 2. वर्षन्तं न निन्देत्तद्व्रतम्
2. 16. 2. ऋतून्न निन्देत्तद्व्रतम्
2. 17. 2. लोकान्न निन्देत्तद्व्रतम्
2. 18. 2. पशून्न निन्देत्तद्व्रतम्
2. 20. 2 ब्राह्मणान्न निन्देत्तद्व्रतम्
Tait. 3. 7. 1. अन्नं न निन्द्यात्तद्व्रतम्
Gauḍa. 3. 13. नानात्वं निन्द्यते यच्च
Nyâsa. 4. निन्दितो न शपेत्परान् Kaṭhaśru. 4.
Gîtâ. 2. 36. निन्दन्तस्तव सामर्थ्यम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

निन्दा

Parama. 2. *vide* आदि

निपद्

Bṛih. 6. 3. 1. या तिरश्ची निपद्यते

निपीड्

Nṛisut. 4. वश्यां स्फुरन्तीमसतीं नि-
पीड्य

निपीडन

Maitri. 6. 20. तालुरसनाग्रनिपीडनात्

निपॄ

Bṛih. 1. 4. 16. यत्पितृभ्यो निपृणाति

निबन्ध्

Maitri. 3. 2. निबध्नात्यात्मनात्मानम्
6. 30.

Mukti. 2. 47. ते निबध्नन्ति नागेन्द्रम्

Gîtâ. 4. 22. कृत्वापि न निबध्यते
41. आत्मवन्तं न कर्माणि नि-
बध्नन्ति
5. 12. फले सक्तो निबध्यते
9. 9. न..निबध्नन्ति धनञ्जय
14. 5. निबध्नन्ति महाबाहो
7. तन्निबध्नाति कौन्तेय
8. तन्निबध्नाति भारत
18. 17. न हन्ति न निबध्यते
60. निबद्धः स्वेन कर्मणा

निबन्ध

Gîtâ. 16. 5. निबन्धायासुरी मता

निबुध्

Kaṭha. 1. 14. प्र ते ब्रवीमि तदु मे निबोध
3. 14. प्राप्य वरान्निबोधत

Gauḍa. 1. 3. त्रिधा भोगं निबोधत
4. त्रिधा तृप्तिं निबोधत
4. 5. अविवादं निबोधत

Nâda. 8. धारणाभिर्निबोधत

Gîtâ. 1. 7. तान्निबोध द्विजोत्तम
18. 13. कारणानि निबोध मे
50. यथा ब्रह्म तथाप्नोति नि-
बोध मे

निभल्

Chhâ. 6. 12. 2. यं..अणिमानं न निभाल-
यसे
6. 13. 2. सत्सोम्य न निभालयसे

निमज्ज्

Śwet. 4. 7. समाने वृक्षे पुरुषो निमग्नः
Muṇḍ. 3. 1. 2.

निमज्जन

Maitri. 1. 4. निमज्जनं पृथिव्याः

निमित्त

Śwet. 6. 5. संयोगनिमित्तहेतुः

Gauḍa. 4. 25. निमित्तस्यानिमित्तत्वम्
27. निमित्तं न सदा चित्तं सं-
स्पृशति

Sarvop. 3. नामदेशकालवस्तुनिमित्तेषु
4. देशकालनिमित्तेषु

Gîtâ. 1. 31. निमित्तानि च पश्यामि

निमित्तता

Gauḍa. 4. 78. बुद्ध्वा निमित्ततां सत्याम्

निमित्तमात्र

Gîtâ. 11. 33. निमित्तमात्रं भव सव्यसा-
चिन्

निमिष्

Kena. 29. एतद्विद्युतो व्यद्युतदा..न्य-
मीमिषदा

Muṇḍ. 2. 2. 1. एजत्प्राणन्निमिषच्च यत्

Gîtâ. 5. 9. उन्मिषन्निमिषन्नपि

निमृज्

Bṛih. 6. 4. 5. अन्तरेण स्तनौ वा भ्रुवौ वा
निमृंज्यात् (MS. निमृ-
ज्यात्)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Tait. 1. 4. 3. नि भगाहं त्वयि मृजे

निमेष

Brih. 3. 8. 9. निमेषा मुहूर्त्ता अहोरात्राणि

Maitri. 6. 14. निमेषादिकालात्

Mahânâr. 1. 8. सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि

निमुच्

Chhâ. 3. 11. 2. न निम्लोच नोदियाय कदाचन

3. न ह वा अस्मा उदेति न निम्लोचति

Brih. 1. 1. 1. निम्लोचन् जघनार्द्धः

नियतमानस

Gîtâ. 6. 15. योगी नियतमानसः

नियतव्रत

Chûl. 20. ब्राह्मणो नियतव्रतः

नियतात्मन्

Gîtâ. 8. 2. ज्ञेयो ऽसि नियतात्मभिः

नियताहार

Gîtâ. 4. 30. अपरे नियताहाराः

नियति

Śwet. 1. 2. कालः स्वभावो नियतिः

नियन्तृ

Maitri. 2. 6. रथः शरीरं मनो नियन्ता

6. 31. एतेषामिह को नियन्ता वा — आत्मा ह्येषां..नियन्ता

Nrisut. 9. नियन्तेश्वरः सर्वाहंमानी

Śiras. 5. रुद्रो हि..इषं..नियन्ता

नियम्

Katha. 3. 13. ज्ञानमात्मानि महति नियच्छेत्

Maitri. 6. 14. काले चास्तं नियच्छन्ति

19. यदा वै..मनो नियम्य

Mund. 1. 2. 1. तान्याचरथ नियतं सत्यकामाः

Mahânâr. 21. 2. दम इति नियतं ब्रह्मचारिणः

Gauda. 2. 13. नियतांश्च बहिश्चित्तः

Brahma. 1. स नियच्छति मधुकरराजानं माक्षीकवत्

Amrita. 23. कालतो नियतः स्मृतः

Mukti. 2. 46. हठान्नियमयन्ति ये

Gîtâ. 1. 44. नरके नियतं वासः

3. 7. नियम्यारभते ऽर्जुन

8. नियतं कुरु कर्म त्वम्

41. नियम्य भरतर्षभ

6. 26. ततस्ततो नियम्यैतत्

7. 20. प्रकृत्या नियताः स्वया

18. 7. नियतस्य तु..कर्मणः

9. यत्कर्म नियतं क्रियते

23. नियतं संगरहितम्

51. धृत्यात्मानं नियम्य च

नियम

Gîtâ. 7. 20. तं तं नियममास्थाय

नियुज्

Gîtâ. 3. 1. मां नियोजयसि केशव

36. बलादिव नियोजितः

18. 59. प्रकृतिस्त्वां नियोक्ष्यति

निरग्नि

Gîtâ. 6. 1. न निरग्निर्न चाक्रियः

निरञ्जन

Śwet. 6. 19. निरवद्यं निरञ्जनम्

Mund. 3. 1. 3. निरञ्जनः परमं साम्यमुपैति

Nrip. 1. 2. ब्रह्मस्वरूपं निरञ्जनम्

Nrisut. 9. सत्यो मुक्तो निरञ्जनः

Brahmab. 8. निर्विकल्पं निरञ्जनम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Dhyâna. 6. तज्ज्ञेयं च निरञ्जनम् Yogat. 14.

Haṁsa. 2. निरञ्जनाय निराभासाय — निरञ्जनः शान्तः प्रकाशितः

Nâr. 2. निर्विकल्पो निरञ्जनः

Vâsu. 3. चित्प्रकाशं निरञ्जनम्

निरध्यवसाय

Maitri. 6. 30. तस्मान्निरध्यवसायः . . तिष्ठेत्

निरन्तरपूतस्थ

Parama. 2. यदा पदे निरन्तरपूतस्थः (4 MSS. have निरन्तरः Nârâyaṇa, however, reads नित्यपूतस्थः)

निरपेक्ष

Nṛisut. 9. आत्मा हि स्वमहिमस्थो निरपेक्षः

Kshur. 21. निरपेक्षः शनैः शनैः

निरभिमान

Maitri. 6. 30. निरभिमानस्तिष्ठेत्

निरम्

Râmap. 49. व्याख्याननिरतः

Mukti. 1. 3. स्वरूपध्याननिरतम्

Gîtâ. 18. 45. स्वकर्मनिरतः

निरय

Maitri. 3. 4. संवृद्ध्युपेतं निरये

निरवद्य

Śwet. 6. 19. निरवद्यं निरञ्जनम

निरविद्य

Nṛisut. 9. निरविद्यो बाह्यान्तरवीक्षणात् (4 MSS. read निरवद्यः)

निरस्

Nṛisut. 2. निरस्ताखिलाविद्यातमोमोहो ऽहमेवेति

Brahmab. 4. निरस्तविषयाङ्गम्

Râmot. 3. निरस्ताविद्यातमोमोहो ऽहमेव

निरहङ्कार

Nṛisut. 6. निरहङ्कारा निरागाः

Tejo. 3. निर्द्वन्द्वो निरहङ्कारः

Gîtâ. 2. 71. निर्ममो निरहङ्कारः 12. 13.

निराकृ

Chhâ. 4. 4. 5. चतुःशता गा निराकृत्य

निराकृतित्व

Maitri. 3. 5. निराकृतित्वमुद्धतत्वं . . इति तामसानि

निराख्या

Nâr. 2. नित्यो निष्कलंको निराख्यातः

निराग

Nṛisut. 6. निरहङ्कारा निरागाः (निरागाराः is a variant)

Mukti. 2. 23. निरागमेव पतति

निरात्मक

Nṛisut. 7. न हीदं सर्वं निरात्मकमात्मैवेदं सर्वम्

8. चिद्धीदं सर्वं निरात्मकमात्मसात्करोति

9. न ह्येतान्निरात्मकमपि न

Amṛita. 11. शून्यं कृत्वा निरात्मकम्

निरात्मकत्व

Maitri. 6. 20. निरात्मकत्वादसंख्यो ऽयोनिः

21. ततो निरात्मकत्वमेति

— निरात्मकत्वान्न सुखदुःखभाग्भवति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निरात्मन्

Maitri. 2. 4. अप्राणो निरात्मा 6. 28; 7. 4.
6. 20. तदात्मनात्मानं दृष्ट्वा निरात्मा भवति

निराधार

Tejo. 6. निराधारं निराश्रयम्

निराधि

Mukti. 2. 32. त्याज्यो वासनौघो निराधिना

निराभास

Haṁsa. 2. निरञ्जनाय निराभासाय

निरालम्ब

Mukti. 1. 33. सर्वसारं निरालम्बम्
1. *vide* मुक्तिका

निराश

Maitri. 6. 30. तत्फलछिन्नपाशो निराशः

निराशिस्

Tejo. 3. निराशीरपरिग्रहः Gîtâ. 6. 10.
Gîtâ. 3. 30. निराशीर्निर्ममो भूत्वा
4. 21. निराशीर्यतचित्तात्मा

निराश्रय

Maitri. 6. 19. तच्च लिङ्गं निराश्रयम्
Amṛita. 13. वायुं कृत्वा निराश्रयम्
Tejo. 5. अव्यक्तं ब्रह्म निराश्रयम्
6. निराधारं निराश्रयम्
Gîtâ. 4. 20. नित्यतृप्तो निराश्रयः

निराहार

Gîtâ. 2. 59. निराहारस्य देहिनः

निरिन्द्रिय

Bṛih. 6. 4. 4. निरिन्द्रिया विसुकृतः
12. निरिन्द्रियो विसुकृत्
Katha. 1. 3. दुग्धदोहा निरिन्द्रियाः
Nṛisut. 7. अशरीरो निरिन्द्रियो ऽप्राणः (ter)

निरिन्धन

Maitri. 6. 34. यथा निरिन्धनो वह्निः

निरीक्ष्

Maitri. 6. 21. महिमानं निरीक्षेत
Gîtâ. 1. 22. यावदेतान्निरीक्षे ऽहम्

निरुक्त

Chhâ. 2. 22. 1. निरुक्तः सोमस्य
8. 3. 3. तस्यैतदेव निरुक्तं हृदयमिति
Tait. 2. 6. 1. निरुक्तं चानिरुक्तं च
Muṇḍ 1. 1. 5. निरुक्तं छन्दो ज्योतिषम्

निरुक्ति

Gopi. 1. गोपीचन्दनमृत्तिकाया निरुक्त्या

निरुध्

Maitri. 6. 34. तावन्मनो निरोद्धव्यम्
Kaivalya. 5. सकलेन्द्रियाणि निरुध्य
Kshur. 3. मनो हृदि निरुध्य च Gîtâ. 8. 12.
4. सर्वद्वारान् निरुध्य च (one MS. reads सर्वद्वाराणि रुध्य च)
Brahmab. 5. तावदेव निरोद्धव्यम्
Haṁsa. 1. विशुद्धौ प्राणान्निरुध्य
Gîtâ. 6. 20. निरुद्धं योगसेवया

निरुपद्रव

Yogat. 15. निर्वाते निर्जने निरुपद्रवे

निरुपाख्य

Maitri. 6. 7. निर्वचनमनौपम्यं निरुपाख्यम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निरूप्

Sarvop. 4. विकारहेतौ निरूप्यमाणे ऽसती

निरूह्

Brih. 3. 9. 26. यस्तान्पुरुषान्निरूह्य
Nrisut. 7. स एतत् सर्वं निरूह्य

निरोदक

Brahma. 3. निरोदका ध्यानसन्ध्या

निरोध

Chhâ. 8. 6. 5. निरोधो ऽविदुषाम्
Maitri. 1. 4. निरोधं पश्यामः
Praśna. 1. 10. इत्येष निरोधः
Gauḍa. 2. 32. न निरोधो न चोत्पत्तिः Brahmab. 10.

निरोधन

Maitri. 6. 20. वाङ्मनःप्राणनिरोधनात्
Mukti. 2. तन्निरोधनं जीवन्मुक्तिः
2. 45. प्राणस्पन्दनिरोधनम्

निर्ऋति

Mahânâr. 2. 8. अपघ्नन्निर्ऋतिं मम

निर्गम्

Maitri. 1. 2. अरण्यं निर्जगाम
Gauḍa. 4. 50. न निर्गता अलातात्ते
52. न निर्गता विज्ञानात्ते
Râmap. 41. वाली तदा निर्जगाम

निर्गुण

Śwet. 6. 11. साक्षी चेता केवलो निर्गुणश्च Brahma. 3.
Maitri. 6. 10. अस्य निर्गुणो भोक्ता
7. 1. निर्गुणः शुद्धो भास्वरः
Chûl. 2. निर्गुणं गुणगह्वरे
14. पुरुषं निर्गुणं सांख्यम्
Gîtâ. 13. 14. निर्गुणं गुणभोक्तृ च

निर्गुणत्व

Gîtâ. 13. 31. अनादित्वान्निर्गुणत्वात्

निर्ग्रन्थ

Jâbâla. 6. *vide* निर्द्वन्द्व

निर्जन

Yogat. 15. निर्वाते निर्जने निरुपद्रवे

निर्झर

Jâbâla. 6. *vide* स्थण्डिल

निर्णय

Gauḍa. 3. 6. तद्वज्जीवेषु निर्णयः
Haṁsa. 1. हंसपरमहंसनिर्णयम्

निर्णिज्

Chhâ. 5. 2. 8. निर्णिज्य कंसं चमसं वा

निर्णी

Mukti. 2. 31. गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर

निर्दह्

Maitri. 1. 2. तेजसा निर्दहन्निव

निर्दिश्

Amrita. 21. क्रमशो मन्त्र निर्दिशेत् (so MSS.; मन्त्र=मन्त्रं Nârâyaṇa).

निर्दी

Ait. 4. 5. श्येनो जवसा निरदीयम्

निर्देश

Râmap. 58. निर्देशस्तस्य चाधुना
Gîtâ. 17. 23. ओं तत्सदिति निर्देशो ब्रह्मणः

निर्दोष

Gîtâ. 5. 19. निर्दोषं हि समं ब्रह्म

निर्द्वन्द्व

Tejo. 3. निर्द्वन्द्वो निरहङ्कारः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Jâbâla. 6. यथाजातरूपधरो निर्द्वन्द्वः (so best MSS.; others have निर्ग्रन्थः)

Gîtâ. 2. 45. निर्द्वन्द्वो नित्यसत्त्वस्थः
5. 3. निर्द्वन्द्वो हि महाबाहो

निर्धाव्

Maitri. 6. 34. समाधिनिर्धौतमलस्य चेतसः

निर्धू

Mukti. 1. 21. निर्धूताशेषपापौघः

निर्नमस्कार

Gauḍa. 2. 37. निस्तुतिर्निर्नमस्कारः

निर्निमित्त

Gauḍa. 4. 75. निर्निमित्तो न जायते

निर्भय

Gauḍa. 1. 25. प्रणवो ब्रह्म निर्भयम्
3. 35. तदेव निर्भयं ब्रह्म

निर्भिद्

Ait. 1. 4. मुखं निरभिद्यत यथाण्डम्
— नासिके निरभिद्येताम्
— अक्षिणी निरभिद्येताम्
— कर्णौ निरभिद्येताम्
— त्वङ् निरभिद्यत
— हृदयं निरभिद्यत
— नाभिर्निरभिद्यत
— शिश्नं निरभिद्यत

Chhâ. 3. 19. 1. तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत

निर्मथन

Śwet. 1. 14. ध्याननिर्मथनाभ्यासात् Brahma. 3; Dhyâna. 20.

Kaivalya. 11. ज्ञाननिर्मथनाभ्यासात्

निर्मन्थ्

Bṛih. 6. 4. 22. हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ

निर्मम

Jâbâla. 6. अनिकेतवास्यप्रयत्नो निर्ममः

Gîtâ. 2. 71. निर्ममो निरहंकारः 12. 13.
3. 30. निराशीर्निर्ममो भूत्वा
18. 53. निर्ममः शान्तो ब्रह्मभूयाय कल्पते

निर्ममत्व

Maitri. 2. 7. अग्राह्यत्वान्निर्ममत्वाच्च

निर्मल

Brahmab. 21. निष्कलं निर्मलं शान्तम्

Mukti. 2. 75. अतीव निर्मलः

Gîtâ. 14. 16. सात्त्विकं निर्मलं फलम्

निर्मलत्व

Gîtâ. 14. 6. तत्र सत्त्वं निर्मलत्वात्प्रकाशकम्

निर्मा

Bṛih. 3. 9. 22. हृदयादिव निर्मितः
4. 3. 9. स्वयं विहत्य स्वयं निर्माय

Kaṭha. 5. 8. कामं कामं . . निर्मिमाणः

निर्मानमोह

Gîtâ. 15. 5. निर्मानमोहा जितसंगदोषाः

निर्माल्य

Skanda. 11. त्यजेदज्ञाननिर्माल्यम्

निर्मितक

Gauḍa. 4. 70. यथा निर्मितको जीवः

निर्मुच्

Maitri. 6. 7. कार्यकारणकर्मनिर्मुक्तम्

Mahânâr. 5. 3. निर्मुक्तो मुक्तकिल्बिषः

Gauḍa. 4. 10. जरामरणनिर्मुक्ताः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

Gîtâ. 7. 28. तें द्वन्द्वमोहनिर्मुक्ताः

निर्मूलनपर

Jâbâla. 6. अशुभकर्मनिर्मूलनपरः

निर्योगक्षेम

Gîtâ. 2. 45. निर्योगक्षेम आत्मवान्

निर्वचन

Maitri. 6. 7. निर्वचनमनौपम्यं निरुपाख्यम्

निर्वप्

Nyása. 1. ब्राह्मेष्टिं निर्वपेत्
2. तासामहोरात्रेण निर्वपेत्

निर्वहितृ

Chhâ. 8. 14. 1. आकाशो वै नाम नामरूपयोर्निर्वहिता

निर्वाण

Yogat. 13. निर्वाणं कुंभकं विदुः
Mukti. 1. 34. चूडानिर्वाणमण्डलम्
1. *vide* बह्वृच

निर्वाणकाल

Kshur. 23. यथा निर्वाणकाले तु

निर्वाणपरम

Gîtâ. 6. 15. शान्तिं निर्वाणपरमाम्

निर्वाणानुशासन

Aruṇeya. 5. एवं निर्वाणानुशासनं वेदानुशासनम् (four MSS. have तन्निर्वाणमनुशासनं); Skanda. 16.

निर्वात

Yogat. 15. निर्वाते निर्जने निरुपद्रवे

निर्वासन

Mukti. 2. 21. यस्य निर्वासनं मनः

निर्वासनीभाव

Mukti. 2. 17. मनो निर्वासनीभावमाचर

निर्विकल्प

Gauḍa. 2. 35. निर्विकल्पो ह्ययं दृष्टः
3. 34. निर्विकल्पस्य धीमतः
Brahmab. 8. निर्विकल्पं निरञ्जनम्
9. निर्विकल्पमनन्तं च
Tejo. 6. निश्चल निर्विकल्पं च
Nâr. 2. निर्विकल्पो निरञ्जनः

निर्विकार

Gitâ. 18. 26. सिद्ध्यसिद्ध्योर्निर्विकारः

निर्विकारिन्

Mukti. 1. 3. साक्षिणं निर्विकारिणम्

निर्विघ्न

Nṛisut. 3. शुद्धः संविष्टो निर्विघ्नः

निर्विण्णचेतस्

Gîtâ. 6. 23. योक्तव्यो योगो निर्विण्णचेतसा

निर्विद्

Bṛih. 3. 5. 1. पाण्डित्यं निर्विद्य
— बाल्यं च पाण्डित्यं च निर्विद्य
— अमौनं च मौनं च निर्विद्य
Nṛip. 1. 1. सतो बन्धुमसति निरविन्दन्

निर्विशङ्क

Kshur. 22. निर्विशङ्कः खमुत्क्रमेत्

निर्विषय

Maitri. 6. 34. मोक्षे निर्विषयं स्मृतम्
Gauḍa. 4. 72. चित्तं निर्विषयं नित्यम्
Brahmab. 2. मुक्तं निर्विषयं स्मृतम्
3. अतो निर्विषयस्यास्य मनसः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Brahmab. 3. तस्मान्निर्विषयं नित्यम्
Skanda. 11. ध्यानं निर्विषयं मनः

निर्वृत्

Chhâ. 3. 19. 1. तदाण्डं निरवर्त्तत
Bṛih. 1. 2. 2. तेजोरसो निरवर्त्तताग्निः
Maitri. 6. 30. सद्ब्रह्मणि . . निर्वृत्तो ऽन्यः
Kaṭhaśru. 1. कार्यं निर्वर्त्तयन्नुदपात्रे
Aśrama. 3. पञ्चमहायज्ञक्रियां निर्वर्त्तयन्तः (4 times).

निर्वृतत्व

Maitri. 6. 22. एतत् सायुज्यत्वं निर्वृतत्वम्

निर्वेद

Muṇḍ. 1. 2. 12. ब्राह्मणो निर्वेदमायात्
Gitâ. 2. 52. तदा गन्तासि निर्वेदम्

निर्वैर

Gîtâ. 11. 55. निर्वैरः सर्वभूतेषु

निर्व्रीडत्व

Maitri. 3. 5. मूढत्वं निर्व्रीडत्वं . . इति तामसानि

निर्हा

Bṛih. 6. 4. 23. तमिन्द्र निर्जहि गर्भेण

निलयन

Tait. 2. 6. 1. निलयनं चानिलयनं च

निवप्

Nṛip. 2. 4. अन्यं ते ऽस्मन्निवपन्तु सेनाः

निवस्

Gîtâ. 12. 8. निवसिष्यसि मय्येव

निवात

Śwet. 2. 10. गुहानिवाताश्रयेण
Maitri. 6. 22. निवाते वदति

निवातस्थ

Gîtâ. 6. 19. यथा दीपो निवातस्थः

निवास

Gîtá. 9. 18. निवासः शरणं सुहृत्

1. निविद्

Râmap. 44. न्यवेदयत तत्त्वतः

2. निविद्

Bṛih. 3. 9. 1. एतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते

निविश्

Maitri. 6. 19. बहिः . . इन्द्रियार्थांश्च निवेशयित्वा
34. चेतसो निवेशितस्यात्मनि
Mahânâr. 15. 8. प्राणे निविष्टो ऽमृतं जुहोमि 9.
— अपाने निविष्टः &c., 9.
— व्याने निविष्टः &c., 9.
— उदाने निविष्टः &c., 9.
— समाने निविष्टः &c., 9.
16. 1. श्रद्धायां प्राणे निविश्यामृतं हुतम्
— अपाने निविश्य &c.
— व्याने निविश्य &c.
— उदाने निविश्य &c.
— समाने निविश्य &c.
Mahâ. 1. तं पुरुषं पुरुषो निवेश्य
Gîtâ. 12. 8. मयि बुद्धिं निवेशय

निवृत्

Kena. 19. स तत एव निववृते 23.
Chhâ. 5. 10. 5. एतमध्वानं पुनर्निवर्त्तन्ते
8. 4. 1. सर्वे पाप्मानो ऽतो निवर्त्तन्ते
Tait. 2. 4. 1. यतो वाचो निवर्त्तन्ते 2. 9. 1; Brahma, 3.
Maitri. 4. 3. यमाप्वा न निवर्त्तते
Gauḍa. 1. 17. प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः
3. 43. कामभोगान्निवर्त्तयेत्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Gauḍa. 4. 80. निवृत्तस्याप्रवृत्तस्य
Nṛip. 5. 10. यत्र गत्वा न निवर्त्तन्ते योगिनः
Nyâsa. 5. भूयस्ते न निवर्त्तन्ते (4 MSS. have निवर्त्तनं)
Mukti. 1. 28. द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्त्तय
Gîtâ. 1. 39. पापादस्मान्निवर्त्तितुम्
2. 59. परं दृष्ट्वा निवर्त्तते
8. 21. यं प्राप्य न निवर्त्तन्ते
25. योगी प्राप्य निवर्त्तते
9. 3. अप्राप्य मां निवर्त्तन्ते
14. 22. न निवृत्तानि कांक्षति
15. 4. यस्मिन् गता न निवर्त्तन्ति भूयः
6. यद्गत्वा न निवर्त्तन्ते

निवृत्ति

Swet. 1. 10. विश्वमायानिवृत्तिः
Gauḍa. 1. 10. निवृत्तेः सर्वदुःखानाम्
Sarvop. 1. तन्निवृत्तिर्मोक्षः
Râmap. 35. स्वनिवृत्त्यर्थमाददे
Mukti. 2. कर्तृत्वादिदुःखनिवृत्तिद्वारा
2. 48. निवृत्तिव्रतधारिणः
Gîtâ. 16. 7. प्रवृत्तिं च निवृत्तिं च 18. 30.

निश्

Mukti. 2. 40. तावन्निशीव वेतालाः

निशा

Chhâ. 4. 1. 2. हंसा निशायामतिपेतुः
Gîtâ. 2. 69. या निशा सर्वभूतानाम् — सा निशा पश्यतो मुनेः

निशाकर

Maitri. 5. 1. त्वमिन्द्रस्त्वं निशाकरः

निशि

Kaṭha. 3. 14. क्षुरस्य धारा निशिता दुरत्यया
Muṇḍ. 2. 2. 3. शरं ह्युपासानिशितम्

निशुच्

Chhâ. 7. 11. 1. निशोचति नितपति वर्षिष्यति वै

निशॄ

Nîla. 14. निशीर्य शल्यानां मुखा (2 MSS. have विशीर्य)

निश्चय

Gîtâ. 6. 23. स निश्चयेन योक्तव्यो योगः
18. 4. निश्चयं शृणु मे तत्र

निश्चर्

Maitri. 6. 32. पृथग्धूमा निश्चरन्ति
Gauḍa 3. 45. निश्चलं निश्चरच्चित्तम्
Gîtâ. 6. 26. यतो यतो निश्चरति

निश्चल

Gauḍa. 3. 22. कथं स्थास्यति निश्चलः
4. 8.
45. निश्चलं निश्चरच्चित्तम्
4. 80. निश्चला हि तदा स्थितिः
Tejo. 6. निश्चलं निर्विकल्पं च
Yogat. 10. अर्द्धमात्रा तु निश्चला
Gîtâ. 2. 53. यदा स्थास्यति निश्चला

निश्चि

Gauḍa. 1. 14. न . . पश्यन्ति निश्चिताः
22. त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः
2. 18. निश्चितायां यथा रज्वाम्
3. 17. द्वैतिनो निश्चिता दृढम्
23. निश्चितं युक्तियुक्तं च
Yogat. 15. निश्चितं चात्मभूतानामरिष्टं योगसेवया
Vâsu. 3. इत्येतन्निश्चितं ज्ञानम्
Gîtâ. 2. 7. निश्चितं ब्रूहि तन्मे
3. 2. तदेकं वद निश्चित्य
16. 11. एतावदिति निश्चिताः
18. 6. निश्चितं मतमुत्तमम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निश्वस्

Bṛih. 2. 4. 10. अस्यैवैतानि सर्वाणि निश्वसितानि 4. 5. 11.
Yogat. 13. उच्छ्वसन्निश्वसंस्तथा

निश्वास

Praśna. 4. 4. उच्छ्वासनिश्वासौ
Amṛita. 33. लक्षश्चैको ऽपि निश्वासः

निश्वासभूत

Mukti. 1. 9. निश्वासभूता मे विष्णोः

निषङ्गति

Nîla. 15. शिवो अस्य निषङ्गतिः

निषञ्ज्

Bṛih. 4. 4. 6. मनो यत्र निषक्तमस्य

निषद्

Śwet. 4. 8. यस्मिन्देवा अधि विश्वे निषेदुः Mahânâr 1. 2; Nṛip. 4. 2; 5. 2.

निषाद

Garbha. 1. षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादाः

निषिच्

Kaush. 1. 2. पुंसा कर्त्रा मातरि मा निषिंच
Bṛih. 6. 3. 7. य एनं शुष्के स्थाणौ निषिञ्चेत् 8—12.

निषिध्

Yogat. 13. निषिद्धे तु नवद्वारे
15. निषिद्धे तु न निर्वाते

निषेव्

Jâbâla. 1. तस्मादविमुक्तमेव निषेवेत Râmot. 1.
Mukti. 2. 12. एकैकशो निषेव्यन्ते

निष्क

Chhâ. 4. 2. 1. निष्कमश्वतरीरथं तदादाय
2. अयं निष्कोऽयमश्वतरीरथः 4.
3. निष्कमश्वतरीरथं दुहितरं तदादाय

निष्कल

Śwet. 6. 19. निष्कलं निष्क्रियं शान्तम्
Muṇḍ. 2. 2. 9. विरजं ब्रह्म निष्कलम्
3. 1. 8. ततस्तु तं पश्यते निष्कलं ध्यायमानः
Kaivalya. 23. गुहाशयं निष्कलमद्वितीयम्
Brahma. 1. विरजं निष्कलं . . ब्रह्म
Nâda. 17. व्यापकं निष्कलं शिवम्
Brahmab. 8. तदेव निष्कलं ब्रह्म
21. निष्कलं निर्मलं शान्तम्
Dhyâna. 10. छाया तस्यैव निष्कला — सकले निष्कले भावे
13. निष्कलं पापनाशनम्
Râmap. 7. निष्कलस्याशरीरिणः

निष्कलंक

Nâr. 2. नित्यो निष्कलंको निराख्यातः (some MSS. read निष्कलः)

निष्काम

Bṛih. 4. 4. 6. अकामो निष्काम आप्तकामः Nṛisut. 5 (ter)
Maitri. 6. 30. विगतभयो निष्कामः
Nṛip. 5. 10. तदेतन्निष्कामस्य भवति
Brahma. 1. यथा कुमारो निष्काम आनन्दमुपयाति

निष्कामत्व

Maitri. 6. 30. परमं वै शेवधेरिव परस्योद्धरणं यन्निष्कामत्वम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निष्कृत्

Kaṭhaśru. 1. सशिखान् केशान्निष्कृत्य 2. 3.

निष्कृति

Mahânâr.22. 1. अग्निहोत्रं सायं प्रातर्गृहाणां निष्कृतिः

निष्क्रम्

Bṛih. 4. 4. 2. तेन प्रद्योतेनैष आत्मा निष्क्रामति
Maitri. 3. 4. अथ मूत्रद्वारेण निष्क्रान्तम्
Nyâsa. 2. अग्निवर्णं निष्क्रामति
Kaṭhaśru. 1. निष्क्रम्य पुत्रं दृष्ट्वा 2.

निष्क्रिय

Śwet. 6. 12. एको वशी निष्क्रियाणां बहूनाम्
19. निष्कलं निष्क्रियं शान्तम्
Brahma. 3. एको मनीषी निष्क्रियाणां बहूनाम् (4 MSS. have निष्क्रियायां)

निष्टक्ष्

Mahânâr 10. 2. वेनादेकं स्वधया निष्टतक्षुः

निष्टि

Mahânâr.11. 8. अधो निष्ट्या वितस्त्यां तु

1. निष्ठा

Bṛih. 6. 4. 9. तस्यामर्थं निष्ठाय 10, 11, 21.

2. निष्ठा

Chhâ. 7. 20. 1. निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञासे
Tejo 9. तन्निष्ठा तत्परायणम्
Gîtâ. 3. 3. लोकेऽस्मिन्द्विविधा निष्ठा
17. 1. तेषां निष्ठा तु का कृष्ण
18. 50. निष्ठा ज्ञानस्य या परा

निष्ठीव्

Chhâ. 2. 12. 2. न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम्

निष्णात

Maitri. 6. 22. शब्दब्रह्मणि निष्णातः Brahmab. 17.

निष्पद्

Gauḍa. 3. 46. निष्पन्नं ब्रह्म तत्तदा

निष्परिग्रह

Nṛisut. 6. निरागा निष्परिग्रहाः
Jâbâla. 6. निर्द्वन्द्वो निष्परिग्रहः

निष्पीड्

Yogat. 3. निष्पीड्य च पयोधरान्

निस्तुति

Gauḍa. 2. 37. निस्तुतिर्निर्नमस्कारः

निस्त्रैगुण्य

Gîtâ. 2. 45. निस्त्रैगुण्यो भवार्जुन

निस्पन्द

Gauḍa. 4. 49. न ततोऽन्यत्र निस्पन्दात् 51.

निस्पृह

Maitri. 2. 7. निस्पृहः प्रेक्षकवदवस्थितः
Parama. 3. सुखे निस्पृहः (MSS. नस्पृहः or न स्पृहा)

निहन्

Bṛih. 4. 4. 3. एवमेवायमात्मेदं शरीरं निहत्य 4.
Maitri. 6. 28. तं ब्रह्मद्वारपारं निहत्याद्यम्
Râmap. 42. निहत्य राघवः
Gîtâ. 1. 36. निहत्य धार्तराष्ट्रान्
11. 33. मयैवैते निहताः पूर्वमेव

निहव

Chhâ. 1. 13. 2. निहव एकारः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निहितार्थ

Swet. 4. 1. वर्णाननेकान् निहितार्थो दधाति (Nârâyaṇa reads निहितार्थान् and gives the above as a variant).

निह्नु

Maitri. 4. 6. ता अभिध्यायेदर्चयेन्निह्नुयाच्च

Gauḍa. 3. 26. स एष नेति नेतीति व्याख्यातं निह्नुते यतः

1. नी (प्रापणे)

Kaush. 3. 8. तं यमधो निनीषते

Chhâ. 1. 8. 5. न स्वर्गं लोकमति नयेदिति

7. न प्रतिष्ठां लोकमति नयेदिति

4. 15. 3. एष हि सर्वाणि वामानि नयति

6. 8. 3. आप एव तदशितं नयन्ते

5. तेज एव तत्पीतं नयते

8. 6. 4. अबलिमानं नीतो भवति

Bṛih. 5. 15. 1. अग्ने नय सुपथा राये Îśâ 18

Kaṭha. 1. 2. दक्षिणासु नीयमानासु

2. 5. अन्धेनैव नीयमाना यथान्धाः Maitri 7. 9; Muṇḍ 1. 2. 8.

Muṇḍ 1. 2. 5. तं नयन्त्येताः सूर्यस्य रश्मयः

Praśna. 3. 5. हुतमन्नं समं नयति

7. पुण्येन पुण्यं लोकं नयति

10. यथासङ्कल्पितं लोकं नयति

4. 4. एतावाहुती समं नयतीति स समानः

Gauḍa. 1. 23. अकारो नयते विश्वम्

Brahma. 1. यथा जलौकाग्रमग्रं नयत्यात्मानं नयति

Amṛita. 3. किल्विषं च क्षयं नीत्वा

Dhyâna. 22. भ्रुवोर्मध्ये नयेल्लयम्

Gîtâ. 6. 26. आत्मन्येव वशं नयेत्

2. नी (√इ)

Kaush. 2. 10. मा त्वं पुत्र्यमघं निगाः

Bṛih. 4. 3. 36. यत्रायमणिमानं न्येति

4. 4. 1. सम्मोहमिव न्येति

नीति

Gîtâ. 10. 38. नीतिरस्मि जिगीषताम्

नीर

Kaṭhaśru. 1. नीरैः सर्वत्रावस्थितैः

नील

Kaush. 3. 1. नास्य पापं चक्रुषो मुखान्नीलं वेतीति

Chhâ. 1. 6. 5. यन्नीलं परःकृष्णम् 6; 1. 7. 4 (bis).

8. 6. 1. शुक्लस्य नीलस्य पीतस्य — एष शुक्ल एष नील एष पीतः

Bṛih. 4. 3. 20. शुक्लस्य नीलस्य पिङ्गलस्य

4. 4. 9. तस्मिञ्छुक्लमुत नीलमाहुः

Swet. 4. 4. नीलः पतङ्गो हरितो लोहिताक्षः

Maitri. 6. 30. कद्रुनीलाः

नीलकण्ठ

Kaivalya. 7. त्रिलोचनं नीलकण्ठं प्रशान्तम्

नीलगलमाल

Nîla. 22. नीलगलमालः शिवः (so Calc. edition, but *vide* नीलागलसाला)

नीलग्रीव

Nîla. 1. नीलग्रीवं शिखण्डिनम्

2. नीलग्रीवं विलोहितम् 10.

21. यः स्वजनान्नीलग्रीवः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नीलतोयद

Mahânâr. 11. 12. नीलतोयदमध्यस्था विद्युल्लेखेव Vâsu. 3.

नीलमुख्य

Râmap. 91. वसिष्ठाद्यैर्मुनिभिर्नीलमुख्यैः

नीललोहित

Nṛip. 1. 6. शङ्करं नीललोहितम्

नीलशिखण्ड

Nîla. 10. नमोऽस्तु नीलशिखण्डाय
22. सर्वेण नीलशिखण्डेन
23. सर्व नीलशिखण्ड वीर
25. नमो नीलशिखण्डाय
— नीलशिखण्डाय नमः

नीलागलसाला

Nîla. 22. नीलागलसाला शिवः (so 2 MSS. and Nârâyaṇa. The MS. of the Dîpikâ is torn here, but this is what remains: नीलागलसाला शिव इति। "अलसालासि पूर्वा शिलाजालास्युत्तरा नीलागलसाला"..मृक् । अस्यामृचि (AV. 6. 16. 4) ओषधीप्रकरणादत्रापि च ओषधे अरुन्धतीति वचनान्नीलागलसाला ओषधी शिवः शिवस.. Four other MSS. read नीलागलसालः, नीलागलत्साला, नीलागलसालाः and नीलागलशीलाः)

नीवार

Aśrama. 3. तदाहृतोदुंबरबदरनीवारश्यामाकैः

नीवारशूक

Mahânâr. 11. 12. नीवारशूकवत्तन्वी Vâsu. 3.

नीहार

Chhâ. 3. 19. 2. यदुल्वं स मेघो नीहारः
Śwet. 2. 11. नीहारधूमार्कानिलानलानाम्

नृ

Nṛip. 2. 4. ना वीर्यतमः श्रेष्ठतमः
Nṛisut. 4. एष उ एव नृ एष हि सर्वत्र सर्वदा सर्वात्मा
Gopî. 5. मण्डनात्पावनं नृणाम्
Gîtâ. 7. 8. शब्दः खे पौरुषं नृषु

नृकेसरि

Nṛip. 1. 5. क्षीरोदार्णवशायिनं नृकेसरिम्

नृकेसरिविग्रह

Nṛip. 1. 6. पुरुषं नृकेसरिविग्रहम्

नृचक्षस्

Mahânâr. 9. 5. सवितारं नृचक्षसम्

नृत्यगीत

Katha. 1. 26. तवैव वाहास्तव नृत्यगीते

नृपोत्तम

Râmap. 33. रघुवीर नृपोत्तम

नृलोक

Gîtâ. 11. 48. एवंरूपः शक्य अहं नृलोके द्रष्टुम्

नृषद्

Katha. 5. 2. नृषद्वरसदृतसत् Mahânâr. 9. 3; 17. 8; Nṛip. 3. 1.

नृसिंह

Mahânâr. 3. 17. नृसिंहाय विद्महे Nṛip. 4. 2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Nrip. 1. 4. नृसिं तृतीयस्याद्यम्
5. हं भी तृतीयस्यार्द्धान्त्यम्
2. 3. नृसिंहं षष्ठं (जानीयात्)
4. कस्मादुच्यते नृसिंहमिति
— तस्मान्नृसिंह आसीत्परमेश्वरः
— तस्मादुच्यते नृसिंहमिति
4. 3. यो वै नृसिंहो देवो भगवान् &c. (32 times).

Nrisut. 2. एष वीरो नृसिंह एव
4. नृसिंहं नत्वा (2 MSS. read नारसिंहं)
— नृसिंह एवैकलः
— एष एव नृसिंहः
— नृसिंहः स्वयमुद्बभौ
5. आत्मन्येव नृसिंहे . . वर्त्तते (bis).
— एष एव नृसिंह एष हि व्याप्ततमः
— आत्मैव नृसिंहो देवः (ter).
— एष एव नृसिंह एष ह्येवोत्कृष्टः
— एतदेव नृसिंहमेतद्धि महाविभूति
6. नृसिंहमनृसिंहं . . बुबुधिरे

Skanda. 14. नृसिंह देवेश तव प्रसादतः

Râmap. 73. यो नृसिंहः समाख्यातः

नृसिंहगायत्री

Nrip. 4. 1. यजुर्लक्ष्मीं नृसिंहगायत्रीमित्यङ्गानि जानीयात्
2. एषा ह वै नृसिंहगायत्री देवानां वेदानां निदानम्

नृसिंहतापनी

Mukti. 1. *vide* गारुड

नृसिंहत्व

Nrisut. 7. नृसिंहत्वाद्भीषणत्वात्

नृसिंहानुष्टुभ्

Nrisut. 6. नृसिंहानुष्टुभैव बुबुधिरे
— नृसिंहानुष्टुभैव जानीयात्
— नृसिंहानुष्टुभान्विष्य

नेति नेति

Brih. 2. 3. 6. अथात आदेशो नेति नेति
3. 9. 26. स एष नेति नेत्यात्मा 4. 2. 4 ; 4. 4. 22 ; 4. 5. 15.

नेतृ

Maitri. 6. 7. आत्मनो त्मा नेतामृताख्यः

नेत्र

Hamsa. 2. बिन्दुस्तु नेत्रम्

नेत्रस्थ

Brahma. 3. नेत्रस्थं जाग्रतं विद्यात्

नेद्

Brih. 1. 3. 10. नेत्पाप्मानं मृत्युमन्ववायानि
1. 5. 23. नेन्मा पाप्मा मृत्युराप्नुवत्

नेदिष्ठ

Kena. 27. ते ह्येनन्नेदिष्ठं पस्पर्शुः
28. स ह्येनन्नेदिष्ठं पस्पर्श

नेमि

Kaush. 3. 8. तद्यथा रथस्यारेषु नेमिरर्पितः

नैकरूप

Maitri. 6. 30. ये नैकरूपाः . . रश्मयः

नैध्रुवि

Brih. 6. 5. 3. शिल्पः कश्यपः कश्यपान्नैध्रुवेः
— कश्यपो नैध्रुविर्वाचः

नैमिषीय

Chhâ. 1. 2. 13. स ह नैमिषीयानामुद्गाता बभूव

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नैरन्तर्य

Sarvop. 2. भावरहितं नैरन्तर्यं चैतन्यं यदा
Mukti. 1. नैरन्तर्येण कृत्वा

नैरात्म्यवाद

Maitri. 7. 8. नैरात्म्यवादकुहकैः

नैर्ऋत्य

Hamsa. 2. नैर्ऋत्ये पापे मनीषा

नैष्कर्म्य

Mukti. 2. 20. नैष्कर्म्येण न तस्यार्थः
Gîtâ. 3. 4. नैष्कर्म्यं पुरुषो ऽश्नुते
18. 49. नैष्कर्म्यसिद्धिं परमाम्

नैष्कारुण्य

Maitri. 3. 5. मात्सर्यं नैष्कारुण्यं...इति तामसानि

नैष्कृतिक

Gîtâ. 18. 28. शठो नैष्कृतिको ऽलसः

नैष्ठिक

Aśrama. 1. आप्रायणाद्गुरोरपरित्यागी नैष्ठिको बृहन्
Gîtâ. 5. 12. शान्तिमाप्नोति नैष्ठिकीम्

नौ

Bṛih. 4. 2. 1. रथं वा नावं वा समाददीत
Mahânâr. 6. 2. नावेव सिन्धुं दुरितात्यग्निः
5. सिन्धुर्न नावा दुरितातिपर्षि
Gîtâ. 2. 67. वायुर्नावमिवाम्भसि

नौधस

Kaush. 1. 5. श्यैतनौधसे चापरौ पादौ

न्यग्रोधफल

Chhâ.6. 12. 1. न्यग्रोधफलमत आहर

न्यस्

Râmap. 22. बीजशक्ती न्यसेत्

न्यायपूर्वक

Gauḍa. 2. 3. श्रूयते न्यायपूर्वकम्

न्याय्य

Gîtâ. 18. 15. न्याय्यं वा विपरीतं वा

न्यास

Mahânâr. 21. 2. न्यास इति ब्रह्मा
— एतान्यवराणि तपांसि न्यास एवात्यरेचयत्
23. 1. न्यास इत्याहुर्मनीषिणो ब्रह्माणम्
24. 1. तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः
Nṛip. 2. 2. अक्षराणां न्यासमुपदिशन्ति ब्रह्मवादिनः
Gîtâ. 18. 2. काम्यानां कर्मणां न्यासम्

न्यून

Bṛih. 6. 4. 24. यद्वा न्यूनमिहाकरम्
Gopî. 5. न्यूनं संपूर्णतां याति

न्ये

Bṛih. 4. 4. 1. स यत्रायमात्माबल्यं न्येत्य

पक्वकषाय

Mukti. 2. 31. ततः पक्वकषायेन नूनं विज्ञानवस्तुना

पक्ष

Bṛih. 4. 3. 19. संहत्य पक्षौ संलयायैव ध्रियते
Tait. 2. 1. 1. अयं दक्षिणः पक्षो ऽयमुत्तरः पक्षः
2. 2. 1. व्यानो दक्षिणः पक्षो ऽपान उत्तरः पक्षः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Tait. 2. 3. 1. ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः
2. 4. 1. ऋतं दक्षिणः पक्षः सत्यमुत्तरः पक्षः
2. 5. 1. मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः
Nâda. 1. अकारो दक्षिणः पक्षः
Haṁsa. 2. अग्नीषोमौ पक्षौ
Âśrama. 4. *vide* धारिन्
— *vide* यज्ञोपवीत

पक्षपात

Brahmab. 6. पक्षपातविनिर्भुक्तम्

पक्षस्

Maitri. 6. 33. शिरःपक्षसीपुच्छपृष्ठवान् (ter)

पक्षिन्

Kaush. 2. 9. तेन मुखेन पक्षिणो ऽस्ति
Bṛih. 2. 5. 18. पुरः स पक्षी भूत्वा
Gîtâ. 10. 30. वैनतेयश्च पक्षिणाम्

पङ्क

Gopî. 5. गोपीचन्दनपङ्केन

पङ्कज

Dhyâna. 22. कूपभूतं तु पङ्कजम्

पंक्ति

Maitri. 7. 5. पंक्तिस्त्रिणवत्रयस्त्रिंशौ.. ऊर्ध्वा उद्यन्ति
Mahânâr. 17. 6. आसहस्रात्पंक्तिं पुनन्ति 7, 8.
Śiras. 7. आचक्षुषः पंक्तिं पुनाति Mahâ. 4.

पङ्गु

Maitri. 4. 2. सदसत्फलमयैः पाशैः पङ्गुरिव बद्धम्

पच्

Bṛih. 5. 9. 1. येनेदमन्नं पच्यते Maitri. 2. 6.
6. 4. 14. क्षीरौदनं पाचयित्वा
15. दध्योदनं पाचयित्वा
16. उदोदनं पाचयित्वा
17. तिलौदनं पाचयित्वा
18. मांसौदनं पाचयित्वा
Katha. 1. 6. सस्यमिव मर्त्यः पच्यते
Śwet. 5. 5. यश्च स्वभावं पचति
Maitri. 6. 12. अन्नेनाभिषिक्ताः पचन्तीमे प्राणाः
15. कालः पचति भूतानि.. महात्मनि
— यस्मिंस्तु पच्यते कालः
17. उदरस्थो ऽथवा यः पचत्यन्नम्
Gauḍa. 4. 90. हेयज्ञेयाप्यपाक्यानि
Garbha. 5. कोष्ठाग्निर्नामाशितपीतलेह्यचोष्यं पचतीति
Gîtâ. 3. 13. ये पचन्त्यात्मकारणात्
15. 14. पचाम्यन्नं चतुर्विधम्

पच्छस्

Chhâ. 5. 2. 7. एतयर्चा पच्छ आचामति

पञ्चतन्मात्र

Maitri. 3. 2. पञ्चतन्मात्रा भूतशब्देनोच्यन्ते
Mahâ. 1. पञ्चतन्मात्राणि पञ्चमहाभूतानि

पञ्चत्व

Gopî. 3. पञ्चत्वं न स पश्यति

पञ्चदश

Kaush. 1. 2. पञ्चदशात् प्रसूतात्
Maitri. 7. 2. त्रिष्टुप् पञ्चदशो बृहत्.. दक्षिणत उद्यन्ति
Mahâ. 1. पञ्चदशी बुद्धिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पञ्चदशन्

Chhâ. 6. 7. 1. पञ्चदशाहानि माशीः
2. स ह पञ्चदशाहानि नाश
Bṛih. 1. 5. 14. रात्रय एव पञ्चदश कलाः
15. वित्तमेव पञ्चदश कलाः
Muṇḍ. 3. 2. 7. गताः कलाः पञ्चदश प्रतिष्ठाः

पञ्चदुःखौघ

Śwet. 1. 5. पञ्चदुःखौघवेगाम्

पञ्चदैवत

Yogaśi. 4. त्रिस्थूणे पञ्चदैवते

पञ्चदैवत्य

Sikhâ. 2. पञ्चधा पञ्चदैवत्यः प्रणवः परिपठ्यते

पञ्चधा

Chhâ. 2. 21. 3. यानि पञ्चधा त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति
7. 26. 2. पञ्चधा सप्तधा नवधा
Maitri. 2. 6. पञ्चधात्मानं विभज्य (bis).
6. 4. पुनः पञ्चधा ज्ञेयम्
Muṇḍ. 3. 1. 9. यस्मिन् प्राणः पञ्चधा संविवेश
Mahânâr. 23. 1. स वा एष पुरुषः पञ्चधा पञ्चात्मा
Praśna. 2. 3. पञ्चधात्मानं प्रविभज्य
3. 12. विभुत्वं चैव पञ्चधा
Chûl. 15. त्रिधा तं पञ्चधा तथा
Sikhâ. 2. पञ्चधा पञ्चदैवत्यः प्रणवः
Piṇḍa. 2. गते पञ्चसु पञ्चधा
Râmap. 10. ब्रह्मण्येवं हि पञ्चधा

पञ्चन्

Chhâ. 3. 13. 1. हृदयस्य पञ्च देवसुषयः
6. एते पञ्च ब्रह्मपुरुषाः
— पञ्चब्रह्मपुरुषान् (bis).
4. 3. 8. एते पञ्चान्ये पञ्चान्ये दश
5. 3. 5. पञ्च . . प्रश्नानप्राक्षीत् Bṛih. 6. 2. 3.
5. 10. 10. य एतानेवं पञ्चाग्नीन् वेद
8. 11. 3. अपराणि पञ्च वर्षाणि (bis).
Bṛih. 4. 4. 17. यस्मिन्पञ्च पञ्च जनाः
Tait. 1. 3. 1. पञ्चस्वधिकरणेषु
Kaṭha. 6. 10. यदा पञ्चावतिष्ठन्ते ज्ञानानि Maitri. 6. 30.
Maitri. 2. 6. पञ्चभी रश्मिभिर्विषयानत्ति 6. 31.
6. 9. पञ्चभिरभिजुहोति
10. इन्द्रियार्थान् पञ्च स्वादूनि भवन्ति
Mahânâr. 13. 6. कृणुष्व पाज इति पञ्च
Nṛip. 2. 2. तस्य हि पञ्चाङ्गानि भवन्ति
Garbha. 1. पञ्चात्मकं पञ्चसु वर्त्तमानम्
5. पञ्च मज्जाशतानि
Amṛita. 5. शब्दादिविषयाः पञ्च
29. पञ्चभिस्तुल्यविक्रमः
35. अथ वर्णास्तु पञ्चानाम्
Piṇḍa. 2. गते पञ्चसु पञ्चधा
Nâr. 4. नारायणायेति पञ्चाक्षराणि
Sarvop. 2. एते पञ्च वर्गाः
— एतेषां पञ्चवर्गाणाम्
Vâsu. 2. कृष्णादिपञ्चनामभिः
Gîtâ. 13. 5. पञ्च चेन्द्रियगोचराः
18. 13. पञ्चेमानि . . कारणानि
15. पञ्चैते तस्य हेतवः

पञ्चपर्व

Śwet. 1. 5. पञ्चपर्वामधीमः

पञ्चपाद

Praśna. 1. 11. पञ्चपादं पितरं द्वादशाकृतिम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पञ्चप्राण

Swet. 1. 5. पञ्चप्राणोर्मिम्

पञ्चबुद्ध्यादि

Swet. 1. 5. पञ्चबुद्ध्यादिमूलाम्

पञ्चब्रह्मन्

Mukti. 1. 38. *vide* अग्निहोत्रक
1. *vide* सरस्वतीरहस्य

पञ्चब्रह्ममन्त्र

Kâlâg. 2. सद्यादिपञ्चब्रह्ममंत्रैः परिगृह्य

पञ्चभूत

Gopî. 4. पञ्चभूतेषु गन्धवतीयं पृथिव्यासीत्

पञ्चम

Kaush. 2. 9. त्वयि पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि
Chhâ. 3. 10. 1. यत्पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन
5. 3. 3. वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति
5. 9. 1. इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति
5. 10. 9. एते पतन्ति चत्वारः पञ्चमश्चाचरंस्तैः
5. 23. 1. अथ यां पञ्चमीं जुहुयात्
7. 1. 2. इतिहासपुराणं पञ्चमम् 7. 2. 1; 7. 7. 1.
4. इतिहासपुराणः पञ्चमः
Tait. 2. 8. 1. मृत्युर्धावति पञ्चमः Kaṭha. 6. 3; Nrip. 2. 4.
Nṛip. 2. 2. सप्रणवं सर्वं पञ्चमं भवति
— पञ्चमं पञ्चमेन (युज्यते)
3. सर्वतोमुखं पञ्चमं (स्थानं जानीयात्)
Garbha. 1. *vide* निषाद
Garbha. 3. पञ्चमे पृष्ठवंशः
Nâda. 10. पञ्चमी नामधेया च
14. पञ्चम्यामथ मात्रायाम्
Piṇḍa. 6. पञ्चमेन तु पिण्डेन
Haṁsa. 2. पञ्चमस्तन्त्रीनादः
— पञ्चमे स्रवते तालु
Râmot. 2. बिन्दुः पञ्चमाक्षरो भवति
Gitâ. 18. 14. दैवं चैवात्र पञ्चमम्

पञ्चमहापातक

Nâr. 5. पञ्चमहापातकोपपातकेभ्यः प्रमुच्यते

पञ्चमहाभूत

Ait. 5. 3. इमानि च पञ्चमहाभूतानि
Maitri. 3. 2. पञ्चमहाभूतानि भूतशब्देनोच्यन्ते
Nṛip. 4. 3. यो वै नृसिंहः . . यानि पञ्चमहाभूतानि (21)
Mahâ 1. पञ्चतन्मात्राणि पञ्चमहाभूतानि
Râmot. 5. यो वै श्रीरामः . . यानि पञ्चमहाभूतानि (17)

पञ्चमहायज्ञ

Aśrama. 3. पञ्चमहायज्ञक्रियां निर्वर्त्तयन्तः (4 times).

पञ्चमात्र

Amṛita. 30. पार्थिवः पञ्चमात्राणि

पञ्चमुख

Kaush. 2. 9. पञ्चमुखो ऽसि प्रजापतिः

पञ्चयोनि

Śwet. 1. 5. पञ्चयोन्युग्रवक्राम्

पञ्चरात्र

Kaṭhaśru. 1. नगरे पञ्चरात्रं . . वसेत्
Aśrama. 4. नगरे तीर्थेषु पञ्चरात्रं वसन्तः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पञ्चवायु

Maitri. 6. 9. पञ्चवायुः समाश्रितः
Prâṇâg. 2. पञ्चवायुभिरावृतः

पञ्चविंशक

Gauḍa. 2. 26. पञ्चविंशक इत्येके
Mahâ. 1. स एष पञ्चविंशकः पुरुषः (Śaṁkarânanda explains स एकः पञ्चविंशतिः पुरुषः)

पञ्चविध

Chhâ. 2. 2. 1. पञ्चविधं सामोपासीत 2. 3. 1; 2. 4. 1; 2. 5. 1; 2. 6. 1.
3. पञ्चविधं सामोपास्ते 2. 3. 2; 2. 4. 2; 2. 5. 2; 2. 6. 2.
2. 7. 1. पञ्चविधं परोवरीयः सामोपासीत
2. पञ्चविधं परोवरीयः सामोपास्ते
— इति तु पञ्चविधस्य

पञ्चशत

Kaush. 1. 4. पञ्चशतान्यप्सरसाम्

पञ्चस्रोतस्

Śwet. 1. 5. पञ्चस्रोतोम्बुम्

पञ्चाक्षर

Râmap. 64. अन्ते पञ्चाक्षरानेवम्

1. पञ्चाग्नि adj.

Kaṭha. 3. 1. पञ्चाग्नयो ये च त्रिणाचिकेताः

2. पञ्चाग्नि

Chhâ. 5. 10. 10. य एतानेवं पञ्चाग्नीन् वेद
Nṛip. 4. 3. यो वै नृसिंहः. . ये पञ्चाग्नयस्तस्मै वै नमो नमः (14)
Râmot. 5. यो वै श्रीरामः. . ये पञ्चाग्नयः (19)

पञ्चात्मक

Śwet. 2. 12. पञ्चात्मके योगगुणे प्रवृत्ते
Garbha. 1. पञ्चात्मकं पञ्चसु वर्त्तमानम्
— पञ्चात्मकं कस्मात्
— अस्मिन् पञ्चात्मके शरीरे
3. पञ्चात्मकः समर्थः
— पञ्चात्मिका चेतसा बुद्धिर्गन्धरसादिज्ञाना
Piṇḍa. 2. भिन्ने पञ्चात्मके देहे

पञ्चात्मन्

Mâhânâr. 23. 1. स वा एष पुरुषः पञ्चधा पञ्चात्मा

पञ्चाल

Chhâ. 5. 3. 1. पञ्चालानां समितिमेयाय
Bṛih. 6. 2. 1. पञ्चालानां परिषदमाजगाम

पञ्चावर्त्त

Śwet. 1. 5. पञ्चावर्त्तां...अधीमः

पञ्चाशत्

Mukti. 1. 13. पञ्चाशद्भेदतो हरे

पञ्चाशद्भेद

Śwet. 1. 5. पञ्चाशद्भेदां...अधीमः

पञ्चेष्टक

Maitri. 6. 33. पञ्चेष्टको वा एषो ऽग्निः संवत्सरः

पट

Maitri. 2. 7. गुणमयेन पटेनात्मानमन्तर्धाय

पटल

Garbha. 5. षोडश पार्श्वदन्तौष्ठपटलानि

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पठ्

Maitri. 6. 9. मन्त्रं पठति
Mahânâr. 17. 6. ये ब्राह्मणास्त्रिसुपर्णं पठन्ति 7. 8.
Chûl. 10. पठन्ते भार्गवा ह्येतत्
11. पठ्यते भृगुविस्तरे
Prâṇâg. 4. इदं वा ब्रह्म यः पठेत्
Amṛita. 10. त्रिः पठेदायतप्राणः
Dhyâna. 1. तच्छ्रुत्वा च पठित्वा च (one MS. omits); Yogat. 1.
Râmap. 94. ये ते पठन्त्यमला यान्ति मोक्षम्
Mukti. 1. 14. तासामेकामृचं यस्तु पठते
27. दशोपनिषदं पठ
29. अष्टोत्तरशतं पठ
42. ये पठन्ति द्विजोत्तमाः
46. पठतां बन्धमोचकम्
50. यः पठेच्छृणुयाद्वापि

पड्वीश

Chhâ. 5. 1. 12. यथा सुहयः पड्वीशशङ्कून् संखिदेत्
Bṛih. 6. 1. 13. यथा महासुहयः पड्वीशशङ्कून् संवृहेत्

पणव

Gîtâ. 1. 13. पणवानकगोमुखाः

पणि

Mahânâr. 10. 2. त्रिधाहितं पणिभिर्गुह्यमानम्

पण्डित

Chhâ. 6. 14. 2. पण्डितो मेधावी
Bṛih. 6. 4. 17. दुहिता मे पण्डिता जायेत
18. पुत्रो मे पण्डितः . . जायेत
Kaivalya. 11. पाशं दहति पण्डितः
Nṛisut. 9. तदेतत्पण्डिता एव पश्यन्ति
Gîtâ. 2. 11. नानुशोचन्ति पण्डिताः
4. 19. तमाहुः पण्डितं बुधाः
5. 4. बालाः प्रवदन्ति न पण्डिताः
18. पण्डिताः समदर्शिनः

पण्डितम्मन्यमान

Kaṭha. 2. 5. स्वयन्धीराः पण्डितम्मन्यमानाः Maitri. 7. 9; Muṇḍ. 1. 2. 8.

पत्

Kena. 1. केनेषितं पतति प्रेषितं मनः
Chhâ. 5. 10. 9. एते पतन्ति चत्वारः
6. 8. 2. दिशं दिशं पतित्वा (bis).
Bṛih. 1. 4. 3. आत्मानं द्वेधापातयत्
4. 3. 20. गर्त्तमिव पतति
Maitri. 7. 8. राजकर्मणि पतितादयः
Mahânâr. 8. 2. कर्तं पतिष्यामि
Gauḍa. 4. 46. न पतन्ति विपर्यये
Mahâ. 3. ललाटात्स्वेदो ऽपतत्
Mukti. 2. 23. निरागमेव पतति
Gîtâ. 1. 42. पतन्ति पितरो ह्येषाम्
16. 16. पतन्ति नरके ऽशुचौ

पतङ्ग

Kaush. 1. 2. कीटो वा पतङ्गो वा Chhâ. 6. 9. 3; 6. 10. 2.
Chhâ. 7. 2. 1. आकीटपतङ्गपिपीलकम् 7. 7. 1; 7. 8. 1; 7. 10. 1.
Bṛih. 6. 1. 14. आक्रमिभ्य आकीटपतङ्गेभ्यः
6. 2. 16. ते कीटाः पतङ्गा यदिदं दन्दशूकम्
Śwet. 4. 4. नीलः पतङ्गो हरितो लोहिताक्षः
Gîtâ. 11. 29. यथा प्रदीप्तं ज्वलनं पतङ्गाः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पतङ्गी

Nâda. 9. पतङ्गी च तृतीया स्यात्

पतञ्चल

Bṛih. 3. 3. 1. पतञ्चलस्य काप्यस्य 3. 7. 1.

3. 7. 1. पतञ्चलं काप्यम् (ter).

— पतञ्चलः काप्यः (bis).

पतत्र

Swet. 3. 3. सं बाहुभ्यां धमति सं पतत्रैः Mahânâr. 2. 2.

पतत्रिन्

Ait. 5. 3. जंगमं च पतत्रि च यच्च स्थावरम्

पति

Chhâ. 1. 2. 11. वाग्घि बृहती तस्या एष पतिः

Bṛih. 1. 3. 20. वाग्वै बृहती तस्या एष पतिः

21. वाग्वै ब्रह्म तस्या एष पतिः

1. 4. 3. पतिश्च पत्नी चाभवताम्

